# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.2.3.6** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – वैयाकरणसिद्धान्तकौमुदी, महाभाष्यं च | |

| प्र. क्र. | प्रथमान्वितिः (Unit 1) | गुणाः |
|---|---|---|
| **प्रश्न १** | **यथेच्छं पञ्चानां रूपाणां ससूत्रं सिद्धिः कार्या।** | १० |
| १ | कर्ता   २ कोटकः   ३ वोढा   ४ जनार्दनः | |
| ५ | चेक्रियः   ६ बुधः   ७ प्रज्ञः | |
| **प्रश्न २** | **निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या।** | १० |
| १ | अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। | |
| २ | इगुपधज्ञाप्रीकिरः कः | |
| ३ | नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः | |

**द्वितीयान्वितिः (Unit 2)**

| | | |
|---|---|---|
| **प्रश्न ३** | **कयोः अपि द्वयोः उत्तरे लेख्ये।** | १० |
| १ | 'पुनर्वसुः' नक्षत्रं 'पुनर्वसू' इत्येतयोः द्वयोः अपि रूपयोः छन्दसि साधुत्वं प्रतिपादयत। | ' |
| २ | छन्दसि 'ऋक्कता' इति रूपं कथं साधु भवति इति प्रतिपादयत। | |
| ३ | 'अयस्मयादीनि च्छन्दसि' इति सूत्रं सोदाहरणं स्पष्टीकुरुत। | |
| **प्रश्न ४** | **कयोः अपि द्वयोः ग्रन्थपङ्क्त्योः अर्थं ससन्दर्भं सोदाहरणं च स्पष्टीकुरुत।** | १० |

१ उपे उपपदे यजेर्विच् । उपयट्।

२ लिः इति च्लेः प्राचां सञ्ज्ञा। एभ्यः लेः लुक् स्यात् मन्त्रे। अक्षन्नमी मदन्त हि।

३ इह छन्दसि बहुलं षष्ठी। घृतस्य घृतेन वा यजते।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्यापि एकस्य प्रश्नस्य उत्तरं लेख्यम्।** **१०**

१ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश॥ इति मन्त्रं भाष्यदिशा व्याख्यात।

२ कः शब्दः इति भाष्यानुगुणं बोधयत।

**प्रश्न ६ कयोः अपि द्वयोः प्रश्नयोः उत्तरे लेख्ये।** **१०**

१ यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥
इत्यस्य पद्यस्य अर्थं भाष्यानुसारं बोधयत।

२ उत त्वः पश्यन्न ददर्श वचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः॥ इति मन्त्रं भाष्यदिशा बोधयत।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशानां प्रश्नानाम् उत्तराणि लिखत।** **१०**

१ प्रायश्चित्तीया मा भूम इत्यतः किं कर्त्तव्यम्?

२ ‘तितउ’ इत्यस्य शब्दस्य कः अर्थः?

३ पुत्रस्य जातस्य नाम कदा विदध्यात्?

४ आहिताग्निः अपशब्दं प्रयुज्य प्रायश्चित्तीयां काम् इष्टिं निर्वपेत्?

५ कानि चत्वारि पदजातानि?

६ ‘नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्’ इति वार्तिकेन वति-प्रत्यये परे नभसादीनां का संज्ञा भवति?

७ ‘छन्दसि परेऽपि’ इति सूत्रेण के छन्दसि धातोः परे भवन्ति?

८ ‘इन्धिभवतिभ्याम्’ इति सूत्रेण किं भवति?

९ ‘अभ्युत्सादयांप्रजनयां......’ इति सूत्रं पूरयत।

१० अहोरात्रे इत्यत्र पूर्ववल्लिङ्गता केन सूत्रेण भवति?

११ नन्द्यादिधातुभ्यः कः प्रत्ययः क्रियते?

१२ उपसर्गे उपपदे आकारान्तात् धातोः कः प्रत्ययः क्रियते?

१३ ददातिदधात्योर्विभाषा कौ प्रत्ययौ प्राप्नुतः?

१४ ‘भिक्षाचरः’ इत्यत्र कः प्रत्ययः?

१५ ‘जनमेजयः’ इत्यत्र मुमागमः केन सूत्रेण क्रियते?